॥ श्रीजिनाय नमः ॥

# ॥ श्रीदशार्णभद्रचरित्रम् ॥

(तृतीयावृत्तिः)

( कर्ता–श्रीशुभशीलगणी )

छपावी प्रसिद्ध कर्त्ता–पण्डित हीरालाल हंसराज ( जामनगरवाळा )

विक्रम सं. १९९४ किंमत रु. ०–४–० सने १९३८

श्रीजैनभास्करोदय प्रिन्टिंग प्रेसमां छाप्युं–जामनगर.

श्री. वि. राजेन्द्रसूरिजी जैन ... तीर्थ, ... २५०८

Scanned by CamScanner

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीदशार्णभद्रचरित्रं प्रारभ्यते ॥

अभिमानं विमुञ्चंति । ये जना ऋद्धिसंभवं ॥ त एव वृण्वते मुक्तिं । दशार्णभद्रभूपवत् ॥ १ ॥ अत्रैव भारते क्षेत्रे दशार्णपुराभिधं पत्तनं वर्तते. तत्र विविधसमृद्धिसंपन्नो दशार्णभद्रनामा राजा राज्यं करोतिस्म. स राजा न्यायमार्गेण राज्यं कुर्वन् निजसंतानवत्प्रजां पालयतिस्म. यतः—पार्थिवानामलंकारः। प्रजानामेव पालनं ॥ किरीटकटकोष्णीषैं—र्भूष्यन्ते केवलं भटाः ॥ १ ॥ स नृपो जैनधर्मैकमानसो नित्यं जिनपूजादिधर्मकार्याणि चकार. यतः—जिनस्य पूजनं हन्ति । प्रातः पापं निशाभवं ॥ आजन्मकृतं मध्याह्ने । सप्तजन्मकृतं निशि ॥ १ ॥ स्वर्गस्तस्य गृहाङ्गणे सहचरी साम्राज्यलक्ष्मीः शुभा । सौभाग्यादिगुणावलिर्विलसति स्वैरं वपुर्वेश्मनि ॥ संसारः सुतरः शिवं करतलक्रोडे लुठत्यंजसा । यः श्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः ॥ २ ॥ यांति दुष्टदुरितानि दूरतः । कुर्वते सपदि संपदः पदं । भूष-



Scanned by CamScanner

यन्ति भुवनानि कीर्तयः । पूजया विहितया जगद्गुरोः ॥ ३ ॥ न यान्ति दास्यं न दरिद्रभावं । न प्रेष्यतां नैव च हीनयोनिं ॥ न चापि वैकल्यमिहेन्द्रियाणां । ये कारयन्त्यत्र जिनेन्द्रपूजां ॥४॥ अथान्यदा तस्य दशार्णपुरस्य निकटस्थे दशार्णगिरौ भगवान् श्रीमहावीरः समवसृतः. देवैरागत्य तत्र समवसरणं विहितं. स्वर्णरत्नरजतवप्रत्रयोपेतं योजनप्रमाणविस्तृतं रत्नकपिशीर्षश्रेणिविराजितं तत्समवसरणमधिकं शोभतेस्म. तत्र समवसरणे सिंहासनोपविष्टश्चतुर्मुखचतुस्त्रिंशदतिशयशाली श्रीमहावीरः चतुःषष्टींद्रादि द्वादशपर्षदामग्रे धर्मोपदेशं दत्तेस्म. यथा–मानुष्यमार्यविषयः सुकुलप्रसूतिः । श्रद्धालुता गुरुवचःश्रवणं विवेकः ॥ मोहांधिते जगति संप्रति सिद्धिसौध–सोपानपद्धतिरियं सुकृतोपलभ्या ॥ १ ॥ मानुषं भवमवाप्य दक्षिणा—वर्त्तशंखवदमुं भवांबुधौ ॥ पूरयेत्सुकृतगांगवारिणा । पापवृत्तिसुरया न चोत्तमः ॥ २ ॥ आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं । व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ॥ दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते । पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ३ ॥ प्रमादः परमद्वेषी । प्रमादः परमं विषं ॥ प्रमादो मुक्तिपुर्दस्युः । प्रमादो नरकालयः ॥ ४ ॥ इत्यादि धर्मोपदेशं

Scanned by CamScanner

प्रभुर्यच्छतिस्म. इतश्चोद्यानपालको द्रुतं दशार्णभद्रनृपसभायां गत्वा बद्धांजलिर्नृपं वर्धापयामास, यथा हे स्वामिन्! दशार्णभद्रपर्वतोपरि भगवान् श्रीमहावीरः समवसृतोऽस्ति, देवैश्च तत्रातीवमनोहरं समवसरणं रचितमस्ति, तन्मध्ये सिंहासनस्थो भगवान् देवादिपर्षदोऽग्रे मधुरवाण्या धर्मदेशनां ददाति. तत् श्रुत्वात्यन्तं हृष्टो दशार्णभद्रनृपोऽपि तस्मै वनपालाय भूरिपारितोषिकं दत्वा विसर्जयामास. तदनंतरं धर्मोल्लसितमानसः स दशार्णभद्रनृपो निजमनसीति व्यचिंतयत्, अहो! अद्य मे पूर्वकृतपुण्यानि सफलीभूतानि यन्मदीयपुरोपांते त्रिजगत्पूज्यो भगवान् समवसृतः. इति विचिंत्य सिंहासनादुत्थाय प्रभुसमवसरणदिशि सप्ताष्टपदानि संमुखं गत्वा स प्रभुं स्तौतिस्म, यथा—असर्वभावेन यदृच्छया वा। परानुवृत्त्या भयतृष्णया वा॥ ये त्वां नमस्यन्ति जिनेन्द्रचन्द्र। तेऽप्यामरीं संपदमाप्नुवंति॥ १॥ अगम्यमध्यात्मविदामवाच्यं। वचस्विनामक्षवतां परोक्षं॥ श्रीवर्धमानाभिधमात्मरूप—महं स्तुतेर्गोचरमानयामि॥ २॥ एवं प्रभुस्तुतिं कृत्वा पश्चान्निवृत्त्य सिंहासने समुपविश्य स निजहृदि व्यचिंतयत्, यथा पुरा केनापि न वन्दितस्तथा महत्या समृध्ध्या प्रातरहं समवसरणे गत्वा प्रभोर्वंदनं करिष्ये इति विचिंत्य स निजनगरे

पटहोद्घोषणां कारयामास, यथा प्रातर्दशार्णभद्रनृपो निजसर्वसमृद्धिसहितो निखिलपरिवारपरिवृतो महावीरप्रभोर्वंदनार्थं गमिष्यति, अतो निखिलैः पौरैरपि सुंदरवस्त्रालंकारालंकृतिं विधाय श्रीवीरप्रभोर्वंदनार्थं समेतव्यं. एवं निजनगरे पटहोद्घोषणां कारयित्वा नगरमध्ये सर्वेऽपि राजमार्गास्तेन विविधरंगवस्त्रपताकाभिरलंकारिताः, स्थाने स्थाने सुगंधपुष्पमालाभिर्मुक्ताफलश्रेणिभिश्च तोरणानि बद्धानि. स्थाने स्थाने स्थापिताभिरगुरुतुरुष्कादिविविधसुगंधद्रव्यधूपघटिकाभिः समस्तमपि तन्नगरं मघमघायमानमभूत्. एवंविधां तन्नगरशोभां निरीक्षितुं देवलोकात्समागता अमररांगना इव पौरनार्यो नानाविधबहुमूल्यवस्त्रालंकाराद्यलंकृताः प्रभुर्वंदनार्थं समुत्सुका इव राजमार्गे विविधवाहनारूढा द्रुतं चलंत्यो नगराद्बहिरुद्याने दशार्णभद्रपर्वताग्रे समाययुः. एवं पौरपुरुषा अपि देवकुमारा इव विविधवस्त्राभूषणभूषिता रथादिवाहनारूढाः श्रीतीर्थनायकपादारविंदविभूषिते तस्मिन् दशार्णभद्रपर्वते प्रभुवन्दनार्थं समागताः, दशार्णभद्रनृपोऽपि निजकिंकरैः स्वपट्टहस्तिनं स्वर्णनूपुरस्वर्णशृंखलादिविविधाभूषणैः शृंगारयामास. तत्पृष्ठस्थापिते नानाविधरत्नजटिते स्वर्णसिंहासने स स्वयं समुपविष्टं प्रभोर्वंदनार्थं चचाल. तस्य सार्धे



Scanned by CamScanner

तस्याष्टादशसहस्राः पुत्रा नानाविधालंकारसुन्दरवस्त्रादिविभूषिता उत्तमजातीयशृंगारिताश्वसमारूढा देवकुमारा इव जनानां विस्मयं कारयन्तश्चेलुः. तत्पृष्ठे चतुरशीतिलक्षा अश्ववारा निजाश्वान्नर्तयंतो विविधायुधानि धारयंतो मूर्तिमंतो वीररसा इव प्रयाणं कुर्वंतिस्म. तत्पृष्ठे वायुचंचलविविधरंगवस्त्रपताकापरिवारैर्गगनांगणं चित्रयंत इव, चक्रचित्कारनादैर्दिग्गगं पूरयन्त एकविंशतिसहस्त्ररथा गमनं विदधतिस्म. खड्गकोदंडशरकुंताद्यनेकशस्त्रमंडिता एकनवतिकोटिप्रमितपत्तयश्च तत्पृष्ठे चेलुः. तत्पृष्टे ध्वजधारिणः षोडशसहस्राः किंकरा गच्छंतिस्म. तत्पृष्टे पंचसहस्रा मेघाडंबरच्छत्रधारिणश्चलंति, तत्पृष्टे एकोनसप्ततिसहस्राः श्रीकरीधारिणो जनाश्चलन्ति, तत्पृष्ठे देवांगना इव नानाविधवस्त्राभूषणभूषिताः पंचशतराज्ञ्यः स्वस्वसुखासनस्थागमनं चक्रुः, सामंतसचिवादयो नृपकुटुम्बिनश्चापि विहिताद्भुतशृंगारा भूपतिसार्थं चेलुः. किंच नृपाज्ञया तत्र स्थाने स्थाने वारांगना विहिताद्भुतशृंगारा नानाविधहावभावोपेतं नृत्यं कुर्वंति. पौरनार्यो मिलित्वा दत्तहस्तताला रासलीलां कुर्वंत्यो मनोहरस्वरेण गीतानि गायन्ति. एवं सकलपरिवारपरिवृतो नृपो याचकेभ्यो रत्नस्वर्णरूप्यदुकूलादिदानं यच्छन् विकीर्णनानाविधसुगंधिपुष्पप्रकरविराजिते



Scanned by CamScanner

राजवर्त्मनि गच्छन् गर्वेण जगदपि तृणमिव मन्यमानश्छत्रादिपरिमंडितः प्रभोर्वंदनार्थं गच्छतिस्म. निजमनसि स चिंतयति, अहो! अद्यावधि केनाप्येवंविधविपुलसमृध्ध्या प्रभुर्वंदितो नास्ति! एवं स निजमनसि भूरि गर्वं बिभर्तिस्म, यतः—मुष्णाति यः कृतसमस्तसमीहितार्थ—संजीवनं विनयजीवितमंगभाजां ॥ जात्यादिमानविषजं विषमं विकारं । सन्मार्दवामृतरसेन नयस्व शांतिं ॥ १ ॥ औचित्याचरणं विलुंपति पयोवाहं नभस्वानिव । प्रध्वंसं विनयं नयत्यहिरिव प्राणस्पृशां जीवितं ॥ कीर्तिकैरविणीं मतंगज इव प्रोन्मूलयत्यंजसा । मानो नीच इवोपकारनिकरं हंति त्रिवर्गं नृणां ॥२॥ तावदाश्रीयते लक्ष्म्या । तावदस्य स्थिरं यशः ॥ पुरुषस्तावदेवासौ । यावन्मानान्न हीयते ॥ ३ ॥ एवमतीवोत्कृष्टया समृध्ध्या प्रभोः समवसरणे गत्वा स दशार्णभद्रो नृपः पंचाभिगमपूर्वकं प्रभुं त्रिःप्रदक्षिणीकृत्य वंदित्वा च यथोचितस्थाने समुपाविशत्. अथ तत्र सभास्थितेन सोधर्मेन्द्रेण निजावधिज्ञानेन तस्य दशार्णभद्रनृपस्य हृदयगताभिमानं विज्ञाय निजमानसे चिंतितं, अहो! जैनधर्मैकदृढचित्तोऽप्ययं भूपो निजहृदि यद्गर्वं धारयति तद्वरं न, अनेन गर्वेण चास्य सज्जनभूपस्याप्यशुभः कर्मबंधो भविष्यति. विश्वपूज्यस्यास्य



Scanned by CamScanner

प्रभोर्भक्तिविषयेऽस्यापूर्वो रागो ज्ञायते, परमेवंविधगर्वेण तत्रासौ निजदूषणं न जानाति. मादृशैर्देवेन्द्रैः सकलदेवपरिवारपरिवृतैरपि निजानंतगुणसमृद्धस्तीर्थंकरः कदापि सर्वर्द्ध्या वंदितुं न शक्यते. इत्यादि विचिंत्य तस्य गर्वोत्तारणाय तेन सौधर्मेन्द्रेण निजदिव्यशक्त्या चतुःषष्टिसहस्रगजेन्द्रा गगनांगणे विचक्रे. तेषामेकैकगजस्य द्वादशाधिकपञ्चशतमुखानि. मुखे मुखेऽष्टावष्टौ दंताः, दन्ते दंतेऽष्टावष्टौ वाप्यः, वाप्यां वाप्यामष्टाष्टकमलानि, कमले कमले एकैका कार्णिका, कर्णिकायां कर्णिकायामिंद्रोपवेशनयोग्यमेकैकं सिंहासनं, सिंहासने सिंहासने निजाग्रमहिषीयुतः शक्रः स्थितोऽस्ति. किं च तत्र कमले कमले लक्षलक्षमितानि पत्राणि, पत्रे पत्रे देवदेवीरचितं द्वात्रिंशद्विधानि नाटकानि. एवमेकगजस्य दन्ताः [४०९६]. एकगजे [३२७६८] वाप्यः. [२६२१४४] पद्मानि [२६२१४४] कर्णिकाः शक्रोपवेशनयोग्यसिंहासनानि च.

[२६२१४४०००००] एकैकपद्मे पत्राणि. [८३९७६०८००००००] नाटकानि. सर्वगजसंख्या [६४०००]. सर्वगजमुखानि [३२७६८०००]. सर्वगजदंताः [२६२१४४०००]. सर्वगजवाप्यः (२०९७१५२०००). सर्वगजपद्मानि (१६७७७२१६०००) सर्वगजनाटकपत्रयोः संख्या (१६७७७२१६००००००००) एवं सर्वनाटकसं-



Scanned by CamScanner

दशार्ण ॥ ८ ॥

ख्या (५३६८७९१२००००००००००) एवंविधसमृद्धिसहितः स सौधर्मेन्द्रो देवदुन्दुभिरम्यं श्रीमहावीरप्रभुगुणगानगर्भं नाट्यं विलोकयन्नभःपथादुत्तीर्य प्रभुं त्रिःप्रदक्षिणीकृत्य वन्दतेस्म. अथैवंविधां श्रीसौधर्मेन्द्रसमृद्धिं विलोक्य स दशार्णभद्रो नृपस्तु भृशमाश्चर्योपेतश्चित्रलिखित इव बभूव. अथ तस्मिन्नवसरे यदा स शक्रस्तस्माद्दिव्यगजादथ उत्तरितुमैच्छत्तदा स गजो निजाग्रिमौ यत्र स्थाने निम्नौ चकार, तत्र गजाग्रपदमित्यभिधानेन तीर्थं लोके प्रसिद्धं जातं. अथ स दशार्णभद्रो नृपस्तादृक् समृद्धियुतं सौधर्मेन्द्रं विभासुरस्वरूपं च निरीक्ष्य निजहृदि दध्यौ—अहो रूपमहो ऋद्धि–रहो स्त्रैणं सुरेशितुः ॥ अहो भक्तिरहो शक्ति–रस्यान्यत्सर्वमप्यहो ॥ १ ॥ अहो मदीयेयं समृद्धिः शक्रसमृध्ध्या अग्रे केवलमणुतुल्यैव दृश्यते, अरेरे! मया मुधैव गर्वो विहितः. अनंतगुणगणालंकृतं तीर्थकरं न कोऽपि सर्वध्ध्र्या वन्दितुं समर्थो भवति. अस्य देवेन्द्रस्य सर्वोत्कृष्टा जिनवन्दनभक्तिर्दृश्यते. मया मुधैव मदीयसमृद्धेर्गर्वः कृतः. अतोऽनया राज्यश्रिया ममालं, मया मदीयसमृध्ध्या मोहस्त्याज्य एव, यतो लक्ष्म्यादिपरिग्रहमोहस्तु दुर्गतिप्रद एव तीर्थकरैर्गदितः, यतः—प्रत्यर्थी प्रशमस्य मित्रमधृतेर्मोहस्य विश्रामभूः । पापानां खनिरापदां पद-

चरित्रम् ॥ ८ ॥

Scanned by CamScanner

मसध्ध्यानस्य लीलावनं ॥ व्याक्षेपस्य निधिर्मदस्य सचिवः शोकस्य हेतुः कलेः । केलिवेश्म परिग्रहः परिहृतेर्योग्यो विविक्तात्मनां ॥ १ ॥ क्रीडोद्यानमविद्यानां । वारिधिर्व्यसनांभसां ॥ कंदस्तृष्णामहावल्ले– रेक एव परिग्रहः ॥ २ ॥ अर्थानामर्जने दुःख—मर्जितानां च रक्षणे ॥ आये दुःखं व्यये दुःखं । धिगर्थं दुःखभाजनं ॥ ३ ॥ क्लेशाय विस्तराः सर्वे । संक्षेपास्तु सुखावहाः । परार्थं विस्तराः सर्वे । त्यागमात्म-हितं विदुः ॥ ४ ॥ सर्पाः पिबन्ति पवनं न च दुर्बलास्ते । शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ॥ कंदैः फलैर्मुनिवरा गमयन्ति कालं । संतोष एव पुरुषस्य परं निधानं ॥ ५ ॥ इत्यादि विचिंत्य स दशार्णभद्र-नृपो वैराग्यपरायणो दीक्षां लातुमुत्सुको बभूव. ततोऽसौ नृपस्तत्रैव पञ्चमुष्टिभिर्निजकचानां लोचं विधाय तादृशीं सकलामपि समृद्धिं विमुच्य प्रभोः पार्श्वे संयमं जग्राह. एवं गृहीतसंयमं तं दशार्णभद्रनृपं विलोक्य सौधर्मेन्द्रस्तं नत्वा प्राह, भो दशार्णभद्रमुनींद्र! त्वया निजप्रतिज्ञापूरणेनाहं विजितः, यतस्त्व-दीयसंयमसमृध्ध्या अग्रे मदीयेयं क्षणविनश्वरा समृद्धिः कपर्दिकातुल्यैवास्ति, इत्युक्त्वा स तस्य स्तुतिं चकार यथा–दशार्णभद्रसत्साधो। संयमश्रीविराजित॥ धन्यस्त्वं येन दुःपूरा। प्रतिज्ञा पूरिता निजा॥१॥



Scanned by CamScanner

पुनः पुनः प्रणुयेति । मुनिं नत्वा जिनाधिपं ॥ संप्राप वासवः स्वर्गं । श्रद्धापूरितमानसः ॥ २ ॥ ततः स दशार्णभद्रो राजर्षिस्तीव्रतपसा क्षिप्तसकलकर्मा लब्धकेवलज्ञानो मुक्तिं ययौ. संपदो जलतरंगविलोला। यौवनं त्रिचतुराणि दिनानि ॥ शारदाभ्रमिव चञ्चलमायुः। किं धनैः कुरुत धर्ममनिंद्यं ॥ १ ॥ स्वप्ने यथायं पुरुषः प्रयाति । ददाति गृह्णाति करोति वक्ति ॥ निद्राक्षये तच्च न किंचिदस्ति । सर्वं तथेदं हि विचार्यमाणं ॥ २ ॥

॥ इति श्रीदशार्णभद्रचरित्रं समाप्तम् ॥ श्रीरस्तु ॥



Scanned by CamScanner